CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लघुग्रन्थमाला

[३३]

म० म० प० सुधाकरद्विवेदिविरचितं

दीर्घवृत्तलक्षणम्

516.02
DWI

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

अभिनवप्रकाशनानि

ग्रन्थनाम	मूल्यम्
१. योगिनीहृदयम्—[तन्त्रशास्त्रम्] तृतीयं संस्करणम्। तन्त्रशास्त्रीयोऽयं ग्रन्थोऽम्बिकानन्दयोगिकृतदीपिकाख्यया भास्कररायकृतसेतुबन्धाख्यया च टीकया समलङ्कृत्य प्रकाशितः—	३३-४०
२. तत्त्वचिन्तामणिः—अनुमानखण्डात्मकः [न्यायदर्शनम्] ग्रन्थरत्नमिदं श्रीयज्ञपति-उपाध्यायकृतया 'प्रभाख्यया' व्याख्यया तथा च विद्वन्मूर्धन्येन न्यायशास्त्रस्य स्वतःप्रमाणभूतेन कुलपतिवरेण आचार्यबदरीनाथशुक्लमहोदयेन च विशिष्टैः टिप्पण-भूमिकापरिशिष्टादिभिः सम्पाद्य प्रकाश्यते—	
३. यन्त्रराजविचारविंशाध्यायी [ज्योतिषशास्त्रम्] आचार्यनयनसुखोपाध्याय-विरचितेऽस्मिन् ग्रन्थे ज्योतिषशास्त्रीयोपयोगिनां वेधादियन्त्राणां सैद्धान्तिकं प्रायोगिकञ्च समालोचनमत्र विहितम्—	११-००
४. भारतीयविचारदर्शनम्—द्वितीयो भागः [आचारशास्त्रम्] ग्रन्थेऽस्मिन् लेखकेन डॉ० हरिहरनाथत्रिपाठिना भारतीयविचाराचाराणाम् ऐतिहासिकं तुलाबोधकञ्च विवेचनं कृतम्—	१०५-६०
५. पालितिपिटकसद्दानुक्कमणिका—[कोशः] पालित्रिपिटकान्तर्गतानां शब्दानां सान्दर्भिकः समावेशोऽत्र द्रष्टुं शक्यते—	१००-६०
६. पुराणेतिहासयोः सांख्ययोगदर्शनविमर्शः [दर्शनशास्त्रम्] अनुसन्धान-प्रबन्धेऽस्मिन् लेखकेन सम्पादकेन च डॉ० श्रीकृष्णमणित्रिपाठिना महता प्रयासेन पौराणिका महाभारतीयाश्च सांख्य-योगपदार्था विवेचिताः—	३२-८०
७. वैशेषिकसिद्धान्तानां गणितीयपद्धत्या विमर्शः [गणितशास्त्रम्] गवेषणा-प्रबन्धेऽस्मिन् वैशेषिकसिद्धान्तानां गणितीयसिद्धान्तमूलकं विश्लेषणं विहितम्—	२४-६०
८. उषारागोदया [नाटिका]—श्रीमद्रुद्रचन्द्रदेवविरचितेयम् उषारागोदया विदुषा डॉ० गौरीनाथशास्त्रिणा पाठभेदादिनिर्धारणपुरःसरं सम्पाद्य प्रकाशिता—	२-००
९. स्तोत्रवल्लरी [स्तोत्रसंग्रहः] श्रीरघुनाथशर्ममहोदयेन विरचितेयं स्तोत्र-वल्लरी ध्रुवं संस्कृतवाङ्मयस्य श्रियं समेधयति—	३-५०
१०. चिद्गगनचन्द्रिका [तन्त्रशास्त्रम्] महाकविकालिदासविरचितोऽयं काव्यमयो ग्रन्थः श्रीरघुनाथमिश्रविरचितया क्रमप्रकाशिकाख्यया व्याख्यया प्रकाशितः—	६०-००
११. संस्कृत आयोग का प्रतिवेदन—भारत सरकार ने सन् १९५६ ई० में डॉ० सुनीतिकुमार चटर्जी की अध्यक्षता में 'संस्कृत आयोग' का गठन किया था। इस आयोग की मौलिक संस्तुति १९५८ ई० में ही अंग्रेजी में प्रकाशित हो गयी थी, जिसका राष्ट्रभाषा हिन्दी में सर्वप्रथम प्रकाशन किया गया है। यह ग्रन्थ संस्कृत-भाषा के चतुरस्र विकास की दिशा में रचनात्मक समाधान प्रस्तुत करता है—	३२-००

प्राप्तिस्थानम्—विक्रयविभागः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

LAGHUGRANTHAMĀLĀ

[Vol. 33]

DĪRGHAVRITTALAKṢAṆAM

By

M. M. P. SUDHĀKARA DVIVEDĪ

Edited By

DR. KRIṢṆACANDRA DVIVEDĪ

Reader & Head of jyotiṣa Department

Sampurnananda Sanskrit Vishvavidyalaya

VARANASI

ज्यो. 366

Research Publication Supervisor

DR. BHĀGĪRATHA PRASĀDA TRIPĀTHĪ 'VĀGĪŚA ŚĀSTRĪ'

Director, Research Institute

Sampurnananda Sanskrit Vishvavidyalaya

VARANASI

1981

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGango

Published By—
Director, Research Institute,
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi.

96.02
Ow

Available At—
Sales Department
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi-221002.

First Edition : 1000 Copies.
Price Rs. 4-50 P.

Printed by—
Tara Printing Works
Varanasi.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त सहितम

लघुग्रन्थमाला

[३३]

म० म० प० सुधाकरद्विवेद्विप्रणीतं

दीर्घवृत्तलक्षणम्

सम्पादकः

विद्यावारिधिः कृष्णचन्द्रद्विवेदी

उपाचार्योऽध्यक्षश्च

ज्योतिषविभागस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

अनुसन्धानप्रकाशनपर्यवेक्षकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थाननिदेशकः,

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वाराणस्याम्

२०३७ तमे वैक्रमाब्दे   १९०२ तमे शकाब्दे   १९८१ तमे खैस्ताब्दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Fu

प्रकाशकः—

अनुसन्धानसंस्थाननिदेशकः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,
वाराणसी ।

प्राप्तिस्थानम्—

विक्रयविभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,
वाराणसी—२२१००२.

प्रथमं संस्करणम् : १००८ प्रतिरूपाणि
मूल्यम् ४-५० रूप्यकाणि

95832

मुद्रकः
तारा यन्त्रालय,
वाराणसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रास्ताविकम्

सर्वविद्याकरत्वं वेदानां समाम्नायते भारतीयपरम्परायाम्। ऋग्वेदादिसंहितासु नक्षत्रविद्याया भूयांसि स्थलानि विलोक्यन्ते। नक्षत्रं नाम ज्योतिः। तद्विज्ञानार्थं यदनुशासनं क्रियते तत् खलु ज्योतिषम्। ज्योतींष्यधिकृत्य कृतो ग्रन्थो ज्योतिषम्। उक्थादिषु न्यायनिरुक्तादिशास्त्रैः सह ज्योतिषशब्दोऽपि पठितः। शाकटायनव्याकरणे तु ज्योतिषशब्दादण्, औत्वाभावस्तु निपात्यते। नेत्रं ज्योतिष्मदिति कृत्वा शास्त्रमिदं वेदोपकारकत्वाद् वेदपुरुषस्य चक्षुःस्थानीयं मतम्। लगधप्रणीतः पद्यमयो लघुग्रन्थस्तावद् ऋग्वेदाङ्गज्योतिषनाम्ना प्रसिद्ध इदानीमपि समुपलभ्यते। किन्तु शास्त्रत्वेन त्रिधा पुष्पितं फलितं चेदं ज्योतिषं जगन्मार्गदर्शकपदं लेभे। इतो गतमिदं पाश्चात्त्ये जगति विविधेषु स्वरूपेषु पल्लवितमभूत्। तज्ज्ञानमपि समये समये तत्तज्ज्योतिषशाखासु समावेशितमिति यथार्थतो विज्ञानपदमलम्भि ज्योतिषशास्त्रेण। वराहमिहिरकालादारभ्येह तादृशज्ञानसमावेशसाक्ष्यमवलोक्यते। सवाईजयसिंहकाले तु स्पष्टतो यवनभाषयाऽऽरब्यभाषया च लिखितानां केषाञ्चन ज्योतिषग्रन्थानां समजनि संस्कृतानुवादः। तदानीं ज्योतिषशास्त्रनदीष्णाः संस्कृतपण्डिताः पाश्चात्त्यभाषानिपुणा अपि भवन्ति स्म।

आधुनिके युगे म० म० बापूदेवशास्त्रि-म०म०सुधाकरद्विवेदिप्रभृतयस्तादृशा विद्वांसोऽभूवन्, ये पाश्चात्त्यभाषाभिज्ञाः पाश्चात्त्यगणितज्ञग्रन्थान् सम्यक् पर्यालोड्य तदाधारेण संस्कृतभाषया स्वोपज्ञग्रन्थान् व्यरचयन्। म० म० श्रीबापूदेवशास्त्रिणा सरलत्रिकोणमितिरिति ग्रन्थो व्यरचि च्छात्रजनहितकाम्यया। तत्परवर्तिना समानकालिकेन गणकशिरोमणिना विद्वत्तल्लजेन विष्वक्प्रतिभाप्रकाशोन्मीलितसंविदा म० म० सुधाकरद्विवेदिना ज्योतिर्विज्ञानक्षेत्रे काऽप्यपूर्वा सुधारसधारा वर्षितेति व्याहारे नास्ति कश्चन संशीतिलेशः।

इह 'दीर्घवृत्तलक्षणम्' इत्याख्ये ग्रन्थे महामतिना तेन प्रायोऽनूनकं विषयं मूलतो वृत्तमुखेन (पञ्चषस्थलेषु गद्येन) समुपवर्ण्य परत उपपत्तयो निर्दशिताः। इत्थमर्वाचीनमपि ज्ञानमिह प्राचीनभारतीयदिशा समाश्रुतं श्रीमद्द्विवेदिमहाभागेन। अण्डवृत्तोपपत्तिमयस्य ग्रन्थस्यास्य विरचनप्रसङ्गे तन्मतेन बहूनामाङ्ग्लभाषामयग्रन्थानां साहायकमङ्गीकृतम्। तत्र Taylor, Lagrange, De Moivre इत्यादीनां कोविदानां नामानि प्राधान्यं भजन्ते। दीर्घवृत्तम् आङ्ग्लभाषाया एलिप्स (Ellips) इति शब्दस्यानुवादः। स तु ग्रीक्भाषाया एलिफिस्शब्दाद् गृहीतोऽभूत्। म०म०सुधाकरद्विवेदिकृतस्य ग्रन्थस्यास्य महिमा 'लोगारिद्म्स' (Logarithms) इत्यस्योपपत्तिदर्शनेन समाकलनीयः कोविदैः। इह ग्रन्थे षष्टितमे पृष्ठे स इत्थमुपवर्णितः—

रूपोननिष्पत्तिहतं सेन्दुनिष्पत्तिसंज्ञकम्।
द्विघ्ननिष्पत्तिभक्तं तल्लघुरिक्थं हतं तथा॥ इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MoE

म० म० बापूदेवशास्त्रिणा लोगारिद्म्स (Logarithms) शब्दस्यानुवादो ...पपत्ति यद्यपि सरलत्रिकोणमितिग्रन्थे 'प्रघातमापकम्' इति शब्देन समाख्यातः, तथापि तद्व्युत्पादनविधिर्न व्याहृतः। सर्वतः प्रथमं श्रीसुधाकरद्विवेदिमहोदयेनैव शब्दोऽसौ **'लघुरिक्थ'** इति संस्कृतानुवादेन निरूपितः। एवमेव ज्योतिर्विज्ञानक्षेत्रे संस्कृतेन बहून् पारिभाषिकान् शब्दाननूद्य नूनं परवर्तिनामन्धतमसाच्छन्नः पन्थाः समुद्भासितः। दीर्घवृत्तलक्षणमिदं तु विशेषतश्छात्राणां हितकाम्यया संदृब्धम्। यथोक्तं प्रणेत्रैव—'छात्रैरेतच्च संचिन्त्यं सर्वं बुद्ध्या विशेषतः' इति (नवमे पृष्ठे)। सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्यान्यत्र च सिद्धान्तज्योतिषाचार्यपरीक्षायां ग्रन्थोऽयं पाठ्यतया निर्धारितोऽपि।

दीर्घवृत्तलक्षणमेतन्महामहोपाध्यायानां सम्मुख एव १८८१ तमे खीस्ताब्दे वाराणसेयचौकस्थितव्रजभूषणदास-एण्ड-कम्पनीतः प्रकाशितम्। द्वितीयसंस्करणमेतदीयं सरस्वतीभवनपुस्तकालयस्थेन विदुषा पण्डितबलदेवमिश्रेण टिप्पण्यादिभिर्विभूष्य सम्पादितं 'मास्टरखेलाड़ीलाल एण्ड सन्स' इत्याख्येन प्रकाशकेन च प्रकाशितं त्रिषष्टिवर्षानन्तरम् १९४३ तमे खीस्ताब्दे। किन्तु तस्यास्यात्यन्तमुपादेयस्य ग्रन्थस्य बहोः कालादप्राप्ततया विद्यार्थिभिस्तद्गुरुभिश्च महत् कष्टमनुभूयते स्मेति तदुपकारधिया विश्वविद्यालयस्यास्य ज्योतिषविभागाध्यक्षेण कर्मठेन महाध्यवसायिना श्रीमता डॉ० कृष्णचन्द्रद्विवेदिना मदीयमवधानं समाकृष्टम्। ततस्तेन महता श्रमेण पुस्तकं सम्पाद्य प्रकाशनार्थं सर्मपितम्। तदिदं लघुग्रन्थमालायास्त्रयस्त्रिंशत्तमप्रसूनतया प्रस्फुटितं लघु प्रकाशमानीतमुपस्थाप्यते। पुस्तकस्यास्य प्रकाशनेन विद्वज्जनाः प्रीणिता जिज्ञासवश्च नूनमुपकृता भविष्यन्तीति ध्रुवं प्रत्येति

वाराणस्याम्
संकष्टचतुर्थ्याम् २०३७ वै०
(२३-१-८१ खी० भृगौ)

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
निदेशकः
अनुसन्धानसंस्थानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूमिका

सिद्धान्तज्यौतिषमधिजिगांसूनां कृते शङ्कुच्छिन्नक्षेत्राणां परिचयोऽतितरामावश्यको भवति। तत्र को नाम शङ्कुः, कानि च शङ्कुच्छिन्नक्षेत्राणीति जिज्ञासायामस्माकं भारतीयानां सूचीक्षेत्रं स्मर्यते। सूचीक्षेत्रं नाम तत्र एकपार्श्वे सूच्याकारत उत्तरोत्तरवृद्धिक्रमेण वृत्तैर्निर्मितं क्षेत्रं सूचीक्षेत्रं नाम, तदेव यवनभाषायाम् [कोन–CONI] शङ्कुरिति व्यपदिश्यते। सा सूची वृत्ताधारा-दृग्वृत्ताधाराप्रभृतिका भवितुमर्हति। तत्र यदि वृत्ताधारा सूची आधारसमानान्तरेण धरातलेन च्छिद्यते, तर्हि च्छिन्नप्रदेशस्य वृत्तत्वं भवति, किन्तु सूच्याः परमाधिकपरमाल्पकर्णमूलगतरेखया यत् त्रिभुजं परमाल्पपरमाधिककर्णाधो वृत्तव्यासैस्त्रिभुजमुत्पद्यते, तत् स्थिरत्रिभुजमिति कथ्यते।

तत्र स्थिरत्रिभुजोपरि लम्बभूतेन धरातलेन सूची छिद्यते। तद्धरातलं चाधारवृत्तधरा-तलस्यासमानान्तरं भवेत्, तर्हि च्छिन्नप्रदेशस्य दीर्घवृत्तत्वम् [एलिप्स–ELLIPSE] भवति। यदि चैककर्णसमानान्तरेण धरातलेन सूचीक्षेत्रं छिद्यते, तर्हि छेदनप्रदेशस्य परवलयत्वम् [पैराबोला–PARABOLA] भवति। सूचीकर्णासमानान्तरधरातलेन सूच्या छेदने सूच्या उभयदिशि वर्धने छिन्नप्रदेशस्य अतिपरवलयत्वम् [हाईपरबोला–HIGHPARBOLA] रूपं भवति। इमानि [कानिसेक्शन–CONICXUN[क्षेत्राणि व्यपदिश्यन्ते।

तत्र च्छायाभ्रमणे चत्वार्यपि क्षेत्राणि उपयुज्यन्ते। वृत्तदीर्घवृत्तयोरुपयोगस्तु सिद्धान्त-ज्यौतिषे प्रायेण भवति। अत्र म० म० प० सुधाकरद्विवेदिना—"यो यस्मिन् खचरान् क्षेत्रे" इत्यादिश्लोकमुखेन वर्णितम्।

तत्र द्विवेदिमहोदयाः कथयन्ति यदीश्वरेण निर्मिते दीर्घवृत्त एव ग्रहाः परिभ्रमन्ति, किन्त्वस्माकमाचार्याः पुरातनयवनाचार्याश्च वृत्ते एव ग्रहाणां गतिमुररीकुर्वन्ति स्म। तेनापि ग्रहाणां गतिषु वैषम्यमकिञ्चित्करमेवोपलभ्यते स्म।

सूर्यकेन्द्रीयग्रहनिकाये केपलरेण दीर्घवृत्तेषु समानेन कालेन समानमेव क्षेत्रफलमाक्रामन् ग्रहो भ्रमतीति निर्धारितम्। तेन हि पुरातनीं समानकालेन समानकोणात्मिकां ग्रहगतिमुपेक्ष्यैव दीर्घवृत्तेषु समक्षेत्रफलाक्रमणनियम उदघोषि।

नियमोऽयं न्यूटनेन गतिविज्ञानेनोपपादितः। ततः प्रभृति दीर्घवृत्तेषु ग्रहाणां गतयो विज्ञानसम्मता समभूवन्।

दीर्घवृत्तस्य लक्षणानि सर्वप्रथमं **परगा**निवासि 'अपोलोनियस'महोदयेनाविष्कृतानि। अयं हि भौतिकविज्ञानोपज्ञातुः 'आर्कमिडीज'महोदयस्य [२८७-२९७] सहयोगी अभवत्, समकालिको वा।

दीर्घवृत्तं भारते कदा प्रभृति अध्ययनाध्यापनेषु लब्धप्रतिष्ठमभवदिति विमर्शनायां ब्रिटिश-राज्यसमकालमेवाधुनिकगणितप्रवेशो भारते समजनि।

सर्वप्रथमं भारतीयलेखकेषु डॉ० आशुतोषमुखोपाध्यायमहोदया आङ्ग्लभाषायां दीर्घवृत्त-लक्षणमलिखत्। तत्र बहूनां विषयाणां रेखागणितेन दीर्घवृत्तलक्षणान्तर्गता व्याख्या व्यधायि।

दीर्घवृत्तं ग्रहगणिते कियदुपयोगीति आधुनिकसिद्धान्तज्यौतिषं पिपठिषूणां नातिरोहितम्। म० म० प० सुधाकरद्विवेदिमहोदयेनातीव सरलया सरण्या दीर्घवृत्तलक्षणानां परिचय उपास्थायि।

छात्राणां यावान् बोधोऽनेन ग्रन्थेन सुशको भवति, नापरैर्ग्रन्थैस्तादृशः सम्भवति; किन्तु दीर्घवृत्तलक्षणोपहिततत्त्वैर्ग्रहाणां मन्दफलसाधने यान्युपकरणान्यपेक्ष्यन्ते, तानि सर्वाणि माननीय-द्विवेदिमहोदयेन नोपस्थापितानि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MoE

यथा रविकेन्द्रतो ग्रहाणां मन्दकर्णानयनस्य परमप्रयोजनीयता मन्दफलसाधने समुपतिष्ठते, तस्य साधनाभावः सुधाकरीयदीर्घवृत्तलक्षणे अध्येतॄणामसन्तोषावह एव ।

भास्कराचार्येण लीलावत्यामुड्डीनमानं साधितम्, तत्तु द्विवेदिमहोदयेन दीर्घवृत्तलक्षणान्तर्गतमेवोपपादि; किन्तु यस्मिन् दीर्घवृत्ते नाभिगतरेखाभ्यां परिधौ समकोणो नोत्पद्यते, तत्र साधनमिदमप्रयोज्यं भवति ।

प०बलदेवमिश्रेण सम्पादिते दीर्घवृत्तलक्षणे बहूनां डॉ० आशुतोषमुखोपाध्यायानां प्रश्नानां समावेशो विहितः, स तु छात्राणां बुद्धिवैशद्यार्थमुपयोगी ।

म० म० प० सुधाकरद्विवेदिमहोदयेन दीर्घवृत्तलक्षणसदृशशुष्कविषयस्य सरलया सुबोधया संस्कृतभाषया समुपस्थापनमतीव चामत्कारिकं विद्यते । छात्राणां विदुषां च सन्तोषार्थमिदानीं दुर्लभप्रायग्रन्थोऽयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन लघुग्रन्थमालायोजनायां सर्वेषां गतपञ्चवर्षाद् अतृप्तानां ज्यौतिषपरीक्षासु प्रविष्टानां छात्राणामुपकारार्थं तथा लुप्तप्रायविद्यानां सञ्जीवनाय प्रकाश्यते ।

म० म० प० सुधाकरद्विवेदिनो दीर्घवृत्तविषयेऽथवा सर्वेषु नवीनगणितविषयेष्वाङ्गलभाषातो संस्कृते हिन्दीभाषायां पारिभाषिकशब्दावलीनां प्रथमनिर्मातारो विद्यन्ते । एलिप्स [ELLIPSE] इत्यस्य दीर्घवृत्तम् । पैराबोला [PARABOLA] इत्यस्य परवलयम्, हाईपरबोला [HIGHPERBOLA] इत्यस्यातिपरवलयम्, कोन [CONE] इत्यस्य शङ्कुः, डिफरेन्सियल करकुलस [DIFFRENTIAL CALCULUS] इत्यस्य चलनकलनम्, इन्टिग्रलकरकुलस [INTEGRAL CALCULUS] इत्यस्य चलराशिकलनम् इत्येवमादयः पारिभाषिकशब्दाः शोभन्ते ।

अद्याप्याधुनिकवैज्ञानिकविषयाणां हिन्दीभाषायामनुवादं कर्त्तुमनसां मनीषिणां प्रेरणास्रोतांसि विद्यन्ते । दीर्घवृत्तस्यानुवादस्तु द्विवेदिमहोदयैस्तथाकृतो यथा तदध्येतॄणां मनसि एतादृशी शङ्कापि नावकाशं लभेत, यदयं ग्रन्थ आङ्गलभाषातोऽनूदितो विद्यते ।

स्वनामधन्या महामहोपाध्यायपदभाजो द्विवेदिमहोदया वाराणसीपरिसरे खजुरीनामकं ग्रामं स्वजन्मनाऽलञ्चकार । स तदानीन्तनानां वाराणसेयानां चतुर्णां चतुराणां मध्ये गण्यते स्म । महाकविर्भारतेन्दुहरिश्चन्द्रः, राजा शिवप्रसादगुप्तसितारेहिन्दः, म० म० प० सुधाकरद्विवेदी इतीमे चत्वारः काशीनगरीचतुरा निगद्यन्ते स्म । चत्वारोऽपि स्वस्वविषयेऽद्वितीया एवासन् ।

महामहोपाध्यायद्विवेदिमहोदयेन तदानीन्तनज्यौतिषपाठ्यप्रणाली नवीनगणितमण्डिताऽकारि । इदानीमपि सैव परिपाटी प्रचलति ।

सन् १८४५ ईस्वीये वत्सरे जन्मवता द्विवेदमहोदयेन १९१० ईस्वीयवत्सरे श्रीविश्वनाथसायुज्यमवापि । स हि मैथिलपण्डितस्य शिष्यः । प्रथितयशसो श्रीबापूदेवशास्त्रिमहोदयस्यालोचकः काशिराजकीयसंस्कृतमहाविद्यालयस्य पुस्तकालयाध्यक्षपदमलङ्कृत्य ज्यौतिषप्रोफेसरपदमपि भूषयाञ्चकार । आशासे यद् विद्वांसः छात्राश्च परिश्रममिमं सफलयिष्यन्तीति ।

वाराणस्याम्
२०३७ वै० सं०
(१-१-१९८१ ख्रै०, गुरौ)

विदुषामाश्रवः
कृष्णचन्द्रद्विवेदी
उपाचार्यः—अध्यक्षश्च, ज्यौतिषविभागस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयानुक्रमणिका

विषयः	सूत्राङ्कः	पृष्ठाङ्कः
दीर्घवृत्तलक्षणम्	१	१
अक्षनाभिलक्षणम्	२	२
भुजकोटिलक्षणम्	३	२
सम्बन्धसाधनम्	४	३
वृहद्व्याससाधनम्	५	४
मूलविन्दुतो भुजेन कोटिसाधनम्	६-७	४-५
लघुव्यासमानम्	८	५
वृहद्व्यासमानम्	८	५
कोटिसाधनम्	९-१०	५-६
लघुव्यासे कोटिमानम्	११	७
लघुव्यासे परिणतकोटिमानम्		
परिधिस्थविन्दुतो नाभिगतरेखयोर्योगस्य स्थिरत्वस्थिरमानस्य तस्य कथनम्	१२	७
वृहद्व्यासतुल्यत्वप्रदर्शनम्	१३-१४	८-९
वृहद्व्यासखण्डाभ्यां लघुव्यासानयनम्		९
लघुव्यासमानकथनम्	१५	९
रूपतुल्ये सम्बन्धे व्यासप्रमाणम्	१६	१०
शून्यतुल्यसम्बन्धे व्यासप्रमाणम्	१७	१०
दीर्घवृत्ते केन्द्रनाभ्यन्तरमानम्	१८	१०
शून्यतुल्ये नाभिकेन्द्रान्तरे वक्रस्य वृत्तत्वम्	१९	११
नाभितो लघुर्व्यासाग्रगतरेखाया वृहद्व्यासार्द्धतुल्यत्वकथनम्	२०	१२
परिधिस्थेतरविन्दुतो भुजकोटिमानप्रदर्शनम्	२१	१२
परिधिस्थविन्दुतः स्पर्शरेखाकरणम्	२२	१४
परिधिवहिस्थविन्दुतः स्पर्शरेखाकरणम्	२३	१५
नाभिभ्यां स्पर्शरेखोपरि कृतलम्बयोर्घातमानम् उड्डीनमानानयनं च	२४	१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: M

विषयः	सूत्राङ्कः	पृष्ठाङ्कः
स्पर्शरेखोपरि कृतलम्बमूलतो नाभिगतरेखायाः ½ वृ० व्या तुल्यत्वम्	२५	१९
स्पर्शरेखाबृहद्व्यासयोगात् केन्द्रगतरेखाभुजयोर्घातस्य (½ वृव्या)² तुल्यत्वकथनम्	२६	२०
स्पर्शरेखालघुव्यासयोगात् केन्द्रगतरेखाया कोटेश्च घातः (½ लव्या)²	२७	२१
स्पर्शरेखोपरि लम्बस्य बृहल्लघुव्यासयोर्लग्नखण्डयोः प्रमाणकथनम्	२८	२१
पूर्वोक्तलम्बस्य बृहद्व्यासावधिखण्डमानम्	२९	२२
स्पर्शरेखोपरि लम्बस्य लघुमानानयनम्	३०	२२
पूर्वोक्तलम्बस्य बृहल्लघुव्यासावधिखण्डयोर्घातमानम्	३१	२२
पूर्णज्यार्द्धबिन्दोर्भुजात् कोटिज्ञानम्	३२	२५
पूर्णज्यासमानान्तरस्पर्शरेखास्थविन्दोर्भुजकोट्यानयनम्	३३	२७
मिथः सक्तपूर्णज्यकासमान्तरा रेखा दीर्घवृत्ते स्पर्शरेखा भवतीति प्रदर्शनम्	३४	२७
बृहल्लघुव्यासयोर्वर्गयोगस्वसक्तपूर्णज्ययोर्वर्गयोर्योगसमः	३५	२८
पूर्णज्याग्राद् नाभिगतरेखयोर्घातमूलमपरस्याः पूर्णज्याया अर्द्धेन तुल्यम्	३६	२९
मिथः सक्तपूर्णज्याग्रबिन्दुस्थस्पर्शरेखाभिरुत्पन्नचतुर्भुजक्षेत्रफलं व्यासयोर्घातेन तुल्यम्	३७	३०
अत्यासन्नबिन्दुभ्यां स्पर्शरेखयोः कृतलम्बयोर्योगतो भुजमानानयनम्	३८	३२
वक्रक्षेत्रसजातीयपरिधौ सजातीयव्यासानयनम्	३९	३३
वक्रक्षेत्रफलस्य तात्कालिकमत्यानयनम्	४०	३४
वक्रक्षेत्रकर्णस्य ,, ,, ,,	४१	३५
वक्रक्षेत्रघनफलस्य ,, ,, ,,	४२	३६
वक्रक्षेत्रपृष्ठक्षेत्रफलस्य ,, ,, ,,	४३	३६
चलराश्योर्घातस्य ,, ,, ,,	४४	३८
चलराशेर्घातस्य ,, ,, ,,	४५	३८
जीवायास्तत्कालगत्यानयनम्, जीवागतितश्चापतत्कालगतिः (अनुकलनम्)	४६	३९
स्थिरसं० गुणितचलराशेस्तात्का० सम्बन्धः	४७	४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयः	सूत्राङ्कः	पृष्ठाङ्कः
चलराशिघातस्य तात्कालिकसम्बन्धतश्चलराशेरानयनम्	४८	४१
स्थिरसंख्यागुणिततात्कालिकसम्बन्धतश्चलराशेरानयनम्	४९	४१
(४९) सूत्रस्यैव स्वरूपमिदम्		४१
स्थिरगुणितचलराशिघातरूपतात्कालिकसम्बन्धः	५०	४२
हरलघुरिक्थांशकस्य भिन्नस्यानुकलनम्	५२	४८
लघुरिक्थीयतात्कालिकसम्बन्धस्यानुकलनम् [अनुकलम् = चलराशेरानयनम्]	५३	४८
दीर्घवृत्तक्षेत्रफलानयनम्, परिध्यानयनञ्च	५४	५३
प्रकारान्तरेण दीर्घवृत्तपरिध्यानयनम्	५५	५५
,, ,, ,,	५६	५५
दीर्घवृत्तघनफलानयनम्, दीर्घवृत्तफलानयनञ्च—	५७	५६
[क] वेगसमानान्तरचतुर्भुजेन परिणावेगानयनम्		५७
[ख] केन्द्रीयबलेनाकृष्टस्य पिण्डस्य दीर्घवृत्ते भ्रमणम्		६०
[ग] सूर्यस्य परितो ग्रहाणां दीर्घवृत्तीयपथे भ्रमणं समानेन कालेन समानमेव क्षेत्रफलाक्रमणम्		७०
ग्रन्थकारपरिचयः		७२

❀ ❀ ❀

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म० म० श्रीसुधाकरद्विवेदिप्रणीम्
उपपत्तिसहितं

दीर्घवृत्तलक्षणम्

❀ ❀ ❀

यो यस्मिन् खचरान् क्षेत्रे नियोज्यासृजदीश्वरः ।
ब्रह्माण्डं तं नमस्कृत्य तल्लक्षणगुणान् ब्रुवे ।। १ ।।

तत्र तावत् तत्क्षेत्रलक्षणं तत्संज्ञा च निरूप्यते

१. नियतस्थितचिह्नाद्या रेखा यत्परिधिं गता ।
नियतस्थितरेखायां यश्च लम्बो वृतिस्थितात् ।।
तद्बिन्दोस्तुल्यसम्बन्धस्त्वनयोर्यदि जायते ।
रूपाल्पो दीर्घवृत्तं तत्क्षेत्रं नव्यैरुदाहृतम् ।।
यथा



चित्रम् १

यदि नियतबिन्दुः (अ) स्यात् यस्मात्क्षेत्रवृतिगत(व)बिन्दुपर्यन्तं कृता अव रेखा तथा कग रेखायां (व) बिन्दोर्लम्बः = वल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं $\frac{\text{अव}}{\text{वल}} < १$, वा $\frac{\text{अन}}{\text{मन}} < १$,

अथच $\frac{\text{अव}}{\text{वल}} = \frac{\text{अन}}{\text{मन}}$ इत्यादि, तदेदं क्षेत्रं दीर्घवृत्तसंज्ञमिति ज्ञेयम् ।

नियतबिन्दुरेखयोर्मूलबिन्दोश्च संज्ञामाह

२. तत्क्षेत्रनाभिः कथिता नवीनैस्तत्क्षेत्रमध्यस्थित एव बिन्दुः ।
स निश्चितो या नियता च रेखा साऽक्षश्च तत्क्षेत्रगुणप्रसिद्ध्यै ॥

यथा



चित्रम् २

नाभिस्थानात्कृतो लम्बस्तदक्षोपरि यत्र सः ।
अक्षे निपतितो बिन्दुर्मूलसंज्ञस्स उच्यते ॥

अत्र "नि" नियतबिन्दुरस्य क्षेत्रस्य नाभिः कथ्यते, कग रेखा तु अक्षसंज्ञा तथा नि स्थानात्कृतस्य निअ लम्बस्य मूलं अ मूलबिन्दुश्चोच्यते नवीनैः ।

अथ क्षेत्रवृतिस्थबिन्दोर्भुजकोट्योः संस्थानम् ।

३. तदक्षलम्बयोर्लम्बौ कार्यौ क्षेत्रवृतिस्थितात् ।
कस्माच्चिदपि बिन्दोः स्तो भुजकोटी क्रमेण ते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



चित्रम् ३

यथा

व बिन्दोः कग अक्षस्योपरि यो वल लम्बः

तद्बिन्द्वोश्च निअ लम्बोपरि वम लम्बश्च यः

तौ व बिन्दोः क्रमेण भुजकोटी भवतः ।

अथ भुजात्कोटयानयनम्

समानसम्बन्धद्योतकवर्णः = इ

अत्र भुजः = वल = मअ, तदा, निव = मअ·इ (द्र० प्रसू) अथ निअ तु सर्वदा स्थिर-संख्यास्ति तद्द्योतकः = प

∴ निम = मअ − अनि = भु − प

वम^2 = निव^2 − निम^2 = भु.इ^2 − (भु − प)^2

अतः सूत्रम्

४. समानसम्बन्धभुजाहतिस्तथा तन्मूलनाभ्यन्तरहोनितो यः ।
भुजस्तयोर्वर्गवियोगमूलं स्यात्कोटिमानं किल दीर्घवृत्ते ॥

अस्मिन् वम^2 = भु^{2}.इ^2 − (भु − प)^2 समीकरणे

यदि वम = ० तथा $\pm$ भु.इ = भु − प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$\therefore$ भु = $\frac{प}{१ + इ}$ वा, भु = $\frac{प}{१ - इ}$ अत्र भुजस्य मानद्वय

अतो लघुभुजः = अस, वृभु = असं अनयोरन्तरं ससं

अयमेव क्षेत्रस्य वृहद्व्यासः तत्स्वरूपं प्रकारान्तरेण

वृभु − लभु = $\frac{प}{१ - इ}$ − $\frac{प}{१ + इ}$ = $\frac{२ इ. प}{१ - इ^२}$ = वृव्या

अतः सूत्रावतारः

५. नाभिमूलान्तरं द्विघ्नं समनिष्पत्तिसंहतम् ।
रूपनिष्पत्तिकृत्योश्च विशेषेण हृत फलम् ॥
बृहद्व्यासाभिधो ज्ञेयो दीर्घवृत्ते विचक्षणैः ।
तस्मादन्यगुणानस्य प्रवदामि विलक्षणान् ॥

६. तल्लम्बक्षेत्रयोगे चेदक्षः कोटिर्मिति तदा ।
भुजाद्वचिम प्रकारेण लब्धवर्णस्फुटेन हि ॥



चित्रम् ४

यदि कग अक्षः कंसगं रेखा स्यात्तदा तु व बिन्दोः सम भुजः वम कोटिरस्ति । अथ तत्र भुजात्कोट्यानयनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

$$अम = भु + सअ = भु + \frac{इ. प}{१ + इ}$$

$$\therefore निव = इ. भु + \frac{इ. प}{१ + इ}, निम = भु - \frac{इ. प}{१ + इ}$$

$$वम^२ = \left\{ इ. भु + \frac{इ. प}{१ + इ} \right\}^२ - \left\{ भु - \frac{इ. प}{१ + इ} \right\}^२$$

$$= भु \ (इ + १) \left\{ इभु - भु + \frac{२ इ प}{१ + इ} \right\} वा,$$

$$भु \left\{ इ + १ \right\} \left\{ भु \ (इ - १) + \frac{२ इ. प \ (१ - इ)}{१ - इ^२} \right\}$$

अथ

$$\frac{२ इ प}{१ - इ^२} = वृव्या = २क \ तदा$$

$$वम^२ = भु \left\{ इ + १ \right\} \left\{ भु \ (इ - १) + २क \ (१ - इ) \right\}$$

$$= भु \left\{ इ + १ \right\} \left\{ २क \ (१ - इ) - भु \ (१ - इ) \right\}$$

$$= भु \left\{ इ + १ \right\} \left\{ (१ - इ) \ (२क - भु) \right\}$$

$$= (१ - इ^२) \ (२क.भु - भु^२)$$

अतः

७. **बृहद्व्यासाद्भुजोनघ्नाद्रूपनिष्पत्तिवर्गयोः।**
अन्तरेण हतान्मूलं कोटिमानं प्रजायते॥

पूर्वसमीकरणे यदि भुजमानम् = $\frac{१}{२}$ वृव्या = क तदा $वम^२ = (१ - इ^२) \ क^२$,

$\therefore वम = क \sqrt{१ - इ^२}$, $२ \ वम = २ \ क \sqrt{१ - इ^२}$ अत्र २ वम = लघुव्यासः

अतः सूत्रम्

८. **समानसम्बन्धशशाङ्कवर्गयोर्विश्लेषमूलं स्वबृहन्मितेन।**
व्यासेन निघ्नं भवतीह नूनं तदल्पविष्कम्भमितिः स्फुटैव॥

अथ

९. **लघुव्यासरेखैव चेद्दीर्घवृत्ते**
भवेदक्षरेखा तदा दोःप्रमाणात्।
यथा कोटिमानं तथा वच्मि विद्वन्
इदं चोपयुक्तं मदुक्तं विचिन्त्यम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा यदि कग′ रेखाऽक्षः स्यात् वल रेखा च भुजः स्यात्। तदा वल′ = पूर्वभुजः = वल + लल′ = भु + $\frac{१}{२}$ वृव्या = भु + क

ततः (७ सूत्रेण)

$$वम^२ = (१ - इ^२) (भु + क) (क - भु) = (१ - इ^२) (क^२ - भु^२)$$

परन्तु (८ सूत्रेण)

$$लव्या = वृव्या \sqrt{१ - इ^२} \therefore \frac{लव्या}{वृव्या} = \sqrt{१ - इ^२}$$

वा, $\frac{लव्या^२}{वृव्या^२} = १ - इ^२$ अत्र, लव्या = २ अ



चित्रम् ५

तदा पूर्वसमीकरणरूपम्

$$वम^२ = (१ - इ^२) (क^२ - भु^२) = \frac{लव्या^२}{वृव्या^२} (क^२ - भु^२)$$

अतः

१०. बृहद्व्यासखण्डान्निजघ्नाद्विहीनात्
स्वदोर्वर्गमित्या पदेनाहतं तत्।
लघुव्यासमाप्तं बृहद्व्यासमित्या
भवेत्कोटिमानं सदा दीर्घवृत्ते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतेनेदं चोपपन्नं भवति

११. बृहद्व्यासार्द्धजे वृत्ते भुजकोटिज्यका हि सा।
लघुव्यासे परिणता सैव कोटिमितिर्भवेत् ॥



चित्रम् ६

अत्र यदि क'ग' अक्षाद्वामपार्श्वे अर्थाद् भुजमितिऋणं स्यात् तदा पूर्वयुक्त्यैवात्रापि ना'अ' = प

∴ द्वावेवाक्षौ नाभिभ्यां तुल्यान्तरितौ भवतः

तथा यदि लघुव्यासरेखायां न मूलबिन्दुर्यस्माद्भुजप्रवृत्तिस्तदा

भु + नअ = भु + नस + अस = भु + क + फ = वल अतः

इ. भु + इक + इफ = नाव एवं

अ'न − नम = नस' + अ'स' − भु = क + फ − भु = वल' अतः

इ. क + इफ − इ. भु = ना'व ∴ २ इक + २ इ. फ = नाव + ना'व अथ च

इ, क, फ; च एते स्थिराङ्का एव, अत्र $फ = \frac{प}{इ+१}$ (द्र० (४) सू)

अतः

१२. नाभिगते ये रेखे परिधिस्थाद्बिन्दुतस्तयोर्योगः।
भवति सदा स्थिर एवमस्मिन्क्षेत्रे विचित्रं तत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding:

अथ

(६ क्षे) $फ = \frac{प}{इ + १}$ अतः फ. इत्यस्य स्थाने $\frac{प}{इ+१}$ अनेनोत्थापनेन

$२ इ क + \frac{२. इ. प}{इ + १} = नाव + नांव =$

वा, $२ इ क + \frac{२ इ प (१ - इ)}{१ - इ^२} = नाव + नांव = २ इक + \frac{२ इ प}{१ - इ^२}$

$\frac{इ \times २ इ प}{१ - इ^२}$ परन्तु $\frac{२ इ प}{१ - इ^२}$ = वृव्या = २ क [द्र० (५) सू]

$\therefore$ २ इक + २ क − २ इक = २ क = नाव + नांव

अतः

१३. [1]तद्दीर्घवृत्तस्य वृतिस्थबिन्दुतो
ये नाभिजाते किल रेखिके स्तः ।
तयोर्बृहद्व्याससमा युतिर्भवेत्
सदा विदेदं विदितं मदुक्तम् ॥

यदि

(१० सू) स्य समीकरणस्यास्य $\frac{२ अ}{२ क} \sqrt{क^२ - भु^२}$

इदं $\frac{२ अ}{२ क} \sqrt{(क + भु) (क - भु)}$ स्वरूपान्तरं स्यात्

तदा

क + भु = सम, क − भु = मसं [द्र० (६) क्षे]

अतः कोटिमानं

$वम = \frac{२ अ}{२ क} \sqrt{सम \times मसं}$ अनेन

कोटिज्ञानाय जातं प्रकारान्तरम्

---

१. सं । यद्वा पूर्वक्षेत्रावलोकनात्
नाव = इं बल, ना'व = इं वल'
$\therefore$ नाव + ना'व = इं वल + इं वल' = इ (वल + वल') = इ लल' = इ-अक्ष'
= सम्र' = वृव्या इत्युपपन्नम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१४. [1]ये च कोटेर्बृहद्व्यासखण्डे तयो-
र्घातमूलं लघुव्यासानिघ्नं भजेत् ।
तद्बृहद्व्यासमित्या समानं फलं
स्यात्पुरोक्तेन मानेन तेनामलम् ॥

अथ

(८ सू) $लव्या = वृव्या \sqrt{१ - इ}$

परन्तु

$$वृव्या = \frac{२ इ प}{१ - इ^२} \; [(५) सू]$$

$$\therefore \; लव्या = \frac{२ इ प \sqrt{१ - इ}}{१ \;\; इ} = \frac{२ इ प}{\sqrt{१ - इ}}$$

अतः

१५. नाभिमूलान्तरं द्विघ्नं समनिष्पत्तिसंहतम् ।
रूपनिष्पत्तिकृत्योश्च विशेषपदसंहृतम् ॥
लघुव्यासो भवेदत्र दीर्घवृत्तेऽन्य ीतितः ।
छात्रैरेतच्च संचिन्त्यं सर्वं बुद्ध्या विशेषतः ॥

इदमुपपन्नं भवति

$$वृव्या = \frac{२ इप}{१-इ^२}, \; लव्या = \frac{२इप}{\sqrt{१-इ^२}} \text{ तथा}$$

---

१. सं । तृतीयक्षेत्रावलोकनादिदं स्फुटं यत्

$$वम^२ = निव^२ - निम^२ = (निव + निम) (निव - निम)$$

$$वा, \; वम^२ = (इ\text{-}वल + निम) (इ\text{-}वल - निम)$$

$$= (इ\text{-}अम + निम) (इ\text{-}अम - निम)$$

$$= \{ इ (अस + सम) + (सम - सनि) \} \{ इ (अस' - स'म) (स'नि - स'म) \}$$

$$= (इ\text{-}अस + इ\text{-}सम + सम - इ - अस) (इअस'\text{-}इ\text{-}स'म\text{-}इ\text{-}स'अ + स'म)$$

$$= (इ\text{-}सम + सम) (स'म\text{-}इ\text{-}सम)$$

$$= सम \; (१ + इ) \; (१ - इ) \; (स'म) = (१ - इ^२) \; सम \; स'म$$

$$\therefore \frac{वम^२}{सम\text{-}स'म} = १ - इ^२$$ एवं यत्र कुत्रापि व विन्दुर्भवतु सर्वत्र इयमेव स्थितिः स्यात्

अथ यदि व विन्दुः लघुव्यासाग्रे भवेत्तदा

$$वम^२ = अ^२, \; सम\text{-}स'म = क^२$$

$$\therefore \frac{अ^२}{क^२} = \frac{वम^२}{सम\text{-}स'म} = १ - इ^२ \quad \therefore वम = \frac{अ\sqrt{सम\text{-}स'म}}{क} = \frac{२अ\sqrt{सम\text{-}स'म}}{२क}$$

इत्युपपन्नम् ।

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: M

$$अस = \frac{प}{१+इ}, \quad सनि = \frac{इप}{१+इ} \left\{ द्र० (३) क्षे \right\}$$

यदि एषु समीकरणेषु इ = १ तदा

$$वृत्या = \frac{२ प}{०} = \infty \quad लव्या = \frac{२ प}{०} = \infty$$

$$अस = \frac{प}{२}, \quad सनि = \frac{प}{२} \quad अतः$$

१६. **निष्पत्तिसंज्ञं यदि रूपतुल्यं**
व्यासप्रमाणे नियते तदा न।

अथ यदि इ = ० तदा

वृव्या = ०, लव्या = ०

अस = प, सनि = ०

अतः

१७. **यदा च शून्येन समं तदा तु**
व्यासौ क्वचिच्छून्यमितौ विदोह्यौ ॥

[द्र० (६) क्षे]

$$अस = \frac{प}{१+इ}, \quad नास = \frac{इप}{१+इ}$$

$$वा, \quad अस = \frac{इ प (१ - इ)}{इ (१ + इ) (१ - इ)} = \frac{इ प (१ - इ)}{इ (१ - इ^२)}$$

परन्तु

$$\frac{इप}{१-इ^२} = \frac{१}{२} वृव्या = क \quad \therefore अस = \frac{क (१ - इ)}{इ}$$

$\therefore$ नास = क (१ − इ), नान = इक = नंान अत्र न विन्दुः = दीर्घवृत्तस्य केन्द्रम् ; अतः

१८. **बृहद्व्यासदलं निघ्नं समनिष्पत्तिसंज्ञया।**
नाभिकेन्द्रान्तरं तत् स्याद्दीर्घवृत्ते विचक्षणाः ॥

यदि ना'', न, स्थाने प्रगच्छेत् तदा

$$नंान = ० = नान, \; न स = क \; \therefore अ स = \frac{क}{इ}$$

$$वा \; नस + अस = अन = प = \frac{क (इ + १)}{इ}$$

$$वृव्या = \frac{२ इप}{१ - इ^२} = \frac{२ इप}{(१ - इ) (१ + इ)} = \frac{२क (इ + १)}{(१ - इ) (१ + इ)}$$

$$= \frac{(२ क)}{(१ - इ)} = २ क \because इक = ० \therefore इ = ०$$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ

लव्या = २क $\sqrt{१ - इ^२}$ [द० (८) सू]

इ = ० अतः लव्या = २ क

तेन

१९. स्वदीर्घवृत्ते यदि केन्द्रनाभ्यन्तरं भवेच्छून्यमितं तदा तद् ।
वृत्तं भवेत्तत्र बुधैर्विधेये व्यासप्रमाणे विदिते समाने ॥

इदं सिद्धयति

अत्र वम^२ = $\frac{(२ अ)^२}{(२ क)}$ (क^२ – भु) [(द्र० १०) सू]

अतो बीजगणितेन वम = $\pm \frac{२ अ}{२ क}\sqrt{क^२ - भु^२}$

यदि भुजमानमृणं स्यात् तदा भु = नमं = नम

एवं कोटिमानमप्यृणं तदा को = वंमं = वम

ततो रेखागणितेन

नव=नवं तथा ह्येते द्वे रेखे चैकैव सरलायां रेखायां भविष्यतः । एवमेवात्र क्षेत्रे यावत्यः पूर्णज्या न बिन्दुगतास्तास्सर्वा न बिन्दौ द्विभक्ता भविष्यन्ति तस्मान्न बिन्दावेव दीर्घवृत्तस्य केन्द्रत्वं युक्तम् ।



चित्रम् ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ

नान = इ·क [द्र० (१८) सू०] अतः

नाका^{२} = नाका^{२} = नान^{२} + कान = इ^{२} क^{२} + कान^{२}

परन्तु कान^{२} = क^{२} (१ – इ^{२})……(८) सूत्रेण

∴ नाका^{२} = नांका = इ^{२}·क^{२} + क^{२} – इ^{२}·क^{२} = क^{२}

ततः

नाका = नाका = क

एतेन

२०. लघुव्यासाग्रगे रेखे नाभिभ्यां भवतः समे ।
बृहद्व्यासार्धतुल्ये च वेदितव्यमिदं विदा ॥

इदं सिद्धयति इतः प्रभृतिः लघुव्यासरेखैवाक्षो ज्ञेयः

अथ

२१. दीर्घवृत्तबहिःस्थान्तःस्था वाऽभीष्टा च रेखिका ।
या तत्स्थाद्बिन्दुतः कस्माल्लम्बौ यौ व्यासयोरिह ॥
भवतो भुजकोटी तौ तस्य बिन्दोस्तथा ब्रुवे ।
रेखास्थितस्य दोर्मानात्कोटिमानमिह स्फुटम् ॥



चित्रम् ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र कोण <ल क व = म

तदा



चित्रम् ९

कल = $\frac{\text{वल म}}{\text{त्रिज्या}}$ (द्रष्टव्या ज्योत्पत्तिः)

अथैकबिन्दोर्भुजकोटिभ्यां परबिन्दोर्भुजज्ञाने तत्कोटिज्ञानायोपायः

मन = प्रभु, वम = प्रको

मंन = द्विभु, वंमं = द्विको

ततः

ममं = वल = मन − मंन = प्रभु − द्विभु

∴ वंल = $\frac{\text{कोज्य} < \text{लवंव (प्रभु-द्विभु)}}{\text{त्रिज्या}}$

परन्तु < लवंव = < लंकवं

∴ वंल = $\frac{\text{म (प्रभु − द्विभु)}}{\text{त्रिज्या}}$, वंमं = प्रको + $\frac{\text{म (प्रभु − द्विभु)}}{\text{त्रिज्या}}$

एवं कोटिज्ञानं कार्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: M

अथ दीर्घवृत्तस्य परिधिस्थबिन्दुतः स्पर्शरेखाकरणं प्रदर्श्यते, कल्प्येते दीर्घवृत्तस्य नाभि-प्रमाणे ना, नां संज्ञे, तथा व बिन्दुर्यस्मात्स्पर्शरेखाकरणमभीष्टम् । नांव रेखा वर्द्धनेन यो



चित्रम् १०

बहिरुत्पन्नकोणस्तस्य वक रेखया समानं भागद्वयं कर्त्तव्यं तदा वक रेखा व बिन्दौ स्पर्शरेखा भविष्यति ना बिन्दोर्वकरेखोपरि नाल लम्बः कर्त्तव्यः नाल, नांव रेखयोर्योगबिन्दुः ग तदा < नावल = < गवल अतः नाव = गव अपिच नांग = नाव + नांव = वृव्या (द्र० १३ सू०)

अथ चेद् वक रेखाया दीर्घवृत्तस्य च च बिन्दावपि योगस्तदा, पूर्वयुक्त्या नाच < चग अतः नांच + चग = वृव्या,

परन्तु नांच + चग > गनां वा > वृव्या, तस्मादिदं न सम्भवति, अतः कव रेखाया व बिन्दोरन्यत्र न कुत्रापि योगस्तदा स्पर्शरेखा, कव रेखा सिद्धा ।

अतः सूत्रम्

२२. बिन्दौ नाभिगताभ्यां रेखाभ्यां यो बहिर्गतः कोणः ।
तस्य समद्विविभागं करोति या स्पर्शरेखा सा ॥

यदि दीर्घवृत्तस्य बहिः कुत्रापि विन्दुः स्याद्यस्मात्स्पर्शरेखा करणीया, तदा कल्प्यते पूर्वयुक्त्या वल स्पर्शरेखा व बिन्दुगताऽस्ति, अत्रापि नाल लम्बः कार्यः तथा नाल = गल तदा (२२ सूत्रेण) नांग = वृव्या, गव = नाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



चित्रम् ११

अतः

२३. निर्दिष्टबिन्दुकेन्द्राद्यद्वृत्तं स्यादेकनाभिगम् ।
यच्चान्यनाभिकेन्द्रात्स्याद्बृहद्व्यासत्रिजीवया ॥
तयोर्योगो भवेद्यत्र तस्माद्रेखाऽन्यनाभिगा ।
परिधौ यत्र संलग्ना तन्निर्दिष्टाख्यचिह्नयोः ॥
मध्ये रेखा भवेद्या सा स्पर्शरेखा भवेद् ध्रुवम् ।
निर्दिष्टबिन्दुतो दीर्घवृत्ते सुगमरीतितः ॥

अत्र वृत्तयोर्योगः स्थानद्वये भवति तेन कस्माच्चिदपि विन्दुतो दीर्घवृत्ते स्पर्शरेखाद्वयं भवितुमर्हतीति सिद्धम् ।

यदि कव स्पर्शरेखोपरि नाभिभ्यां नाल, नांलं लम्बौ कार्यौ गंल = नांलं, नाल = गल,

तदा < नागंनां = < म, तस्मात् नांग^2 – नांना^{2} = गंग^2 – गंना^{2}

परन्तु नांग = २नांज (द्र० २०) तथा नानां = २नांच,

∴ ४नांज^2 – ४नांच^2 = गंग^2 – गंना^{2}, अथ ४नांज^2 – ४नांच = ४चज^2

∴ ४चज^2 = ४($\frac{1}{2}$ लव्या)^2 = गंग^2 – गंना^{2} =

(गंग + गंना^{2}) (गंग – गंना) परन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: M



चित्रम् १२

गंग + गंना = गंल + गल + गंना = गंल + गंल = २नांलं

एवं गंग − गंना = २नाल, तेन ४ $(\frac{1}{2}$लव्या$)^2$ = ४नाल × नांलं

अतः $(\frac{1}{2}$ लव्या$)^2$ = नाल × नांलं

तस्मात् सूत्रम्

२४. **नाभिभ्यां यौ स्पर्शरेखोपरि स्तो**
लम्बौ घातो यस्तयोस्सर्वदैव ।
अल्पव्यासार्धस्य वर्गेण तुल्यो
विद्वान्बुध्वेत्यन्यसूत्रं विधेयम् ॥

यथा श्रीभास्कराचार्योक्तोदाहरणम्

वृक्षाद् हस्तशतोच्छ्रयाच्छतयुगे वापीं कपिः कोऽप्यगा-
दुत्तीर्याथ परो द्रुतं श्रुतिपथेनोड्डीय किञ्चिद् द्रुमात् ।
यातैवं समता तयोर्यदिगतावुड्डीनमानं कियद्
विद्वन् चेत्सुपरिश्रमोऽस्ति गणिते क्षिप्रं तदाचक्ष्व मे ॥

अत्र, अक = ताउ, कग = सअं, अघ = रड्डी

अथ, अघ + गघ = अक + गक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतो यदि अ, ग कस्यापि दीर्घवृत्तस्य नाभिमाने भवेताम् तर्हि क, घ बिन्दू दीर्घवृत्तेऽवश्यमेवाभविष्यताम् ।

तदा, अक + कग = ताउ + सअं = वृव्या

वा, ताउ + सअं = २ ग ट अतः

$$\frac{\text{ताउ}^2 + \text{सअं}^2 + २\ \text{ताउ सअं}}{४} = \text{गट}^2$$

एवं, $\text{अक}^2 + \text{कग}^2 = \text{ताउ}^2 + \text{सअं}^2 = \text{अग}^2$, $\therefore \frac{\text{ताउ}^2 + \text{सअं}^2}{४}$

$= \text{गज}^2$, ततो $\text{जट}^2 = \text{गट}^2 - \text{गज}^2$

वा $\text{जट}^2 = \frac{\text{ताउ. सअं}}{२} = (\frac{१}{२}\ \text{लव्या})^2$

अथ, घक रेखा, च पर्यन्तं वर्द्धनीया, यथा, घच = घग एवं गच रेखाया ल चिह्ने समानं भागद्वयं कृत्वा तत्र लल' लम्बः कार्यः। तदेयं रेखा स्पर्शरेखा भविष्यति घ चिह्ने, अस्या उपरि अ चिह्नाच्च अल' लम्बो विधेयः



चित्रम् १३

तदा $\text{अल'} \times \text{गल} = (\frac{१}{२}\ \text{लव्या})^2 = \frac{\text{ताउ. सअं}}{२} \therefore \text{अल'} = \frac{\text{ताउ. सअं}}{२\text{गल}}$

अथ $\angle$ग घ ल = $\angle$च घ ल = $\angle$अ घ ल', अतः ग घ ल त्रिभुजं अ घ ल' त्रिभुजं च, एते द्वे सजातीये

३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा क ग च जात्यं ल घ च जात्यं च मिथः सजातीयम्,

$$\text{तदा घ च} = \frac{\text{ल च} \times \text{ग च}}{\text{क च}}$$, परन्तु ग च=२ ल च, तथा

$$\text{क च} = \text{अ च} + \text{अ क} = \text{ताउ} + \text{सअं} + \text{ताउ} = \text{२ ताउ} + \text{सअं}$$

$$\therefore \text{घ च} = \frac{\text{ल च}^2 \times \text{२}}{\text{२ ताउ} + \text{सअं}} = \text{ग घ}$$, त्रैराशिकेन

$$\text{अ घ} = \frac{\text{अ ल}' \times \text{ग घ}}{\text{ग ल}} = \frac{\text{अ ल}' \times \text{ल च}^2 \times \text{२}}{\text{ल च (२ ताउ} + \text{सअं)}}$$, परन्तु

$$\text{अ ल}' = \frac{\text{ताउ} \times \text{सअं}}{\text{२ ल च}} \qquad \text{अतः अ घ} = \frac{\text{ताउ} \times \text{सअं}'}{\text{२ ताउ} + \text{सअं}}$$

एतेन

द्विनिघ्नतालोच्छ्रितिसंयुतं यत् सरोऽन्तरं तेन विभाजितायाः ।
तालोच्छ्रितेस्तालसरोऽन्तरघ्न्या उड्डीनमानं खलु लभ्यते तत् ।

इति श्रीभास्करोक्तमुपपन्नं भवति ।

कल्प्यते व, बिन्दुः वल स्पर्शरेखा ना, ना नाभिसंज्ञे, के, दीर्घवृत्तस्य केन्द्रम्, तदा पूर्वयुक्त्या नांल = गल, नाग=वृव्या, तथा केना = केनां अतो रेखागणितेन केल = $\frac{१}{२}$ वृव्या तथा नाव रेखा केल रेखायास्समानान्तरा भविष्यति



चित्रम् १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेन

२५. नाभिभ्यां यौ स्पर्शरेखोपरि स्तो लम्बौ कार्यें दीर्घवृत्तस्य केन्द्रम् ।
तन्मूलाभ्यां रेखिके ते च तुल्येऽनल्पव्यासार्धेन तुल्ये भवेताम् ॥

इत्युपपन्नं भवति ।

अत्र केग = ? लव्या, वर = व बिन्दोः कोटिः,

केर=केन्द्राद् भूजमानम्, यर=अक्षमानम्



चित्रम् १५

तदा $\frac{\text{नाग}}{\text{इ}} = \text{केअ} = \frac{\text{वृव्या}}{\text{२इ}}$

एवं $\frac{\text{नाव}}{\text{इ}} = \text{अर} \quad \therefore \quad \frac{\text{नाव} - \text{नाग}}{\text{इ}} = \text{अर} - \text{केअ} = \text{केर}$

अथ नावल त्रिभुजं नांवलं त्रिभुजस्य सजातीयम्,

अतः $\frac{\text{नांव}}{\text{नाव}} = \frac{\text{नांलं}}{\text{नाल}}, \quad \frac{\text{नांव} + \text{नाव}}{\text{नाव}} = \frac{\text{नांलं} + \text{नाल}}{\text{नाल}} = \frac{\text{वृव्या}}{\text{नाव}}$

वा $\frac{\frac{\text{नांलं}}{२} + \frac{\text{नाल}}{२}}{\text{नाल}} = \frac{\frac{१}{२}\text{वृव्या}}{\text{नाव}}$, परन्तु नाल, नांलं योगार्धतुल्यम् के बिन्दोः 'वल स्पर्शरेखोपरि यो लम्बस्तस्य मानम्,

अर्थात् केगं मानम्, अथ नाटल त्रिभुजं तु टकेगं त्रिभुजस्य सजातीयम् तेन (नाके + केट)

$\frac{\text{केगं}}{\text{नाल}} = \text{केट}$

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परन्तु $\frac{\text{केग}}{\text{नाल}} = \frac{\frac{1}{2}\text{वृव्या}}{\text{नाव}}$ ∴ (नाके + केट) $\frac{\frac{1}{2}\text{वृव्या}}{\text{नाव}}$ = केट

वा नाके $\frac{1}{2}$ वृव्या + $\frac{1}{2}$ वृव्या, केट = नाव, केट

$\therefore$ केट = $\frac{\text{नाके } \frac{1}{2} \text{ वृव्या}}{\text{नाव} - \frac{1}{2} \text{ वृव्या}}$, अत्र नाके = $\frac{1}{2}$ वृव्या × इ

$\therefore$ केट = $\frac{(\frac{1}{2}\text{ वृव्या})^2 \text{ इ}}{\text{नाव} - \frac{1}{2}\text{ वृव्या}} = \frac{(\frac{1}{2}\text{वृव्या})^2}{\frac{\text{नाव} - \frac{1}{2}\text{वृव्या}}{\text{इ}}}$

परन्तु $\frac{\text{नाव} \cdot \frac{1}{2} \text{ वृव्या}}{\text{इ}}$ = केर = भुज

$\therefore$ केट = $\frac{(\frac{1}{2} \text{ वृव्या})}{\text{केर}}$ $\therefore$ केर × केट = $(\frac{1}{2}\text{वृव्या})^2$

एतेन

२६. बृहद्व्यासस्पर्शरेखायोगात् केन्द्रावधिर्भवेत् ।
या रेखा दोस्तया निघ्नं फलं स्यात् सर्वदा स्थिरम् ॥
बृहद्विष्कम्भखण्डस्य वर्गेण सततं समम् ।
दीर्घवृत्ते बुधैश्चिन्त्यं मवुक्तं सर्वदा भृशम् ॥

अत्र केय = व बिन्दोः कोटिः, रट = केट − केर = $\frac{(\frac{1}{2}\text{वृव्या})^2 - \text{केर}^2}{\text{केर}}$



चित्रम् १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परन्तु $\left(\frac{१}{२}\,\text{वृव्या}\right)^{२} - \text{केर}^{२} = \dfrac{\frac{१}{४}\,\text{वृव्या}^{२} - \text{केय}^{२}}{\frac{१}{४}\,\text{लव्या}^{२}}$,

अतः $\text{केड} = \dfrac{\text{केट} \times \text{रव}}{\text{रट}} = \dfrac{\text{केट} \times \text{केय}}{\text{रट}}$

वा, $\text{केड} = \dfrac{\left(\frac{१}{२}\text{वृव्या}\right)^{२}}{\text{केर}} \times \text{केय} \times \text{केर} \times \left(\frac{१}{२}\text{लव्या}\right)^{२} \div \left(\frac{१}{२}\text{वृव्या}\right)^{२} \times \text{केय}^{२}$ वा,

$\text{केड} = \dfrac{\left(\frac{१}{२}\text{लव्या}\right)^{२}}{\text{कय}}$ $\quad \therefore \text{केड} \times \text{केय} = \left(\frac{१}{२}\text{लव्या}\right)$

एतेन—

२७. **लघुव्यासस्पर्शरेखायोगात् केन्द्रावधिर्भवेत् ।**
या रेखा कोटिगुणिता वर्गोऽल्पव्यासखण्डजः ॥

इत्युपपद्यते ।

२८. **यस्मिन् बिन्दौ स्पर्शरेखास्ति तस्माल्लम्बो यः स्यात् स्पर्शरेखोपरिष्ठः ।**
लग्नो यत्र व्यासयोस्तत्प्रमाणे विज्ञातव्ये वक्ष्यमाणप्रकारात् ॥

कल्प्यते व बिन्दोः वट रेखोपरि गंव लम्बः,

यस्य बृहल्लघुव्यासाभ्यां क्रमेण ग, गं बिन्दौ सम्पातः, तदा गवट त्रिभुजं जात्यं स्यात्,

अतो रेखागणितस्य षष्ठाध्यायेन,



चित्रम् १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परन्तु $\frac{\text{केग}}{\text{नाल}} = \frac{\frac{1}{2}\text{वृव्या}}{\text{नाव}}$ ∴ $(\text{नाके}+\text{केट})\frac{\frac{1}{2}\text{वृव्या}}{\text{नाव}} = \text{केट}$

वा नाके $\frac{1}{2}$ वृव्या + $\frac{1}{2}$ वृव्या, केट = नाव, केट

$\therefore \text{केट} = \frac{\text{नाके}\ \frac{1}{2}\ \text{वृव्या}}{\text{नाव} - \frac{1}{2}\ \text{वृव्या}}$, अत्र नाके = $\frac{1}{2}$ वृव्या × इ

$$\therefore \quad \text{केट} = \frac{(\frac{1}{2}\ \text{वृव्या})^2\ \text{इ}}{\text{नाव} - \frac{1}{2}\ \text{वृव्या}} = \frac{(\frac{1}{2}\text{वृव्या})^2}{\frac{\text{नाव} - \frac{1}{2}\text{वृव्या}}{\text{इ}}}$$

परन्तु $\frac{\text{नाव} - \frac{1}{2}\ \text{वृव्या}}{\text{इ}} = \text{केर} = \text{भुज}$

$\therefore \quad \text{केट} = \frac{(\frac{1}{2}\ \text{वृव्या})^2}{\text{केर}}$ ∴ केर × केट = $(\frac{1}{2}\text{वृव्या})^2$

एतेन

२६. बृहद्व्यासस्पर्शरेखायोगात् केन्द्रावधिर्भवेत् ।
या रेखा वोस्तया निघ्नं फलं स्यात् सर्वदा स्थिरम् ॥
बृहद्विष्कम्भखण्डस्य वर्गेण सततं समम् ।
दीर्घवृत्ते बुधैश्चिन्त्यं मवुक्तं सर्वदा भृशम् ॥

अत्र केय = व बिन्दोः कोटिः, रट = केट − केर = $\frac{(\frac{1}{2}\text{वृव्या})^2 - \text{केर}^2}{\text{केर}}$



चित्रम् १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परन्तु $\left(\frac{1}{2}\text{ वृव्या}\right)^2 - \text{केर}^2 = \dfrac{\frac{1}{4}\text{ वृव्या}^2 - \text{केय}^2}{\frac{1}{4}\text{ लव्या}^2}$,

अतः $\text{केड} = \dfrac{\text{केट} \times \text{रव}}{\text{रट}} = \dfrac{\text{केट} \times \text{केय}}{\text{रट}}$

वा, $\text{केड} = \dfrac{\left(\frac{1}{2}\text{वृव्या}\right)^2}{\text{केर}} \times \text{केय} \times \text{केर} \times \left(\frac{1}{2}\text{लव्या}\right)^2 \div \left(\frac{1}{2}\text{वृव्या}\right)^2 \times \text{केय}^2$ वा,

$\text{केड} = \dfrac{\left(\frac{1}{2}\text{लव्या}\right)^2}{\text{कय}}$ $\quad \therefore \text{केड} \times \text{केय} = \left(\frac{1}{2}\text{लव्या}\right)$

एतेन—

२७. **लघुव्यासस्पर्शरेखायोगात् केन्द्रावधिर्भवेत् ।**
याःरेखा कोटिगुणिता वर्गोऽल्पव्यासखण्डजः ॥

इत्युपपद्यते ।

२८. **यस्मिन् बिन्दौ स्पर्शरेखास्ति तस्माल्लम्बो यः स्यात् स्पर्शरेखोपरिष्ठः ।**
लग्नो यत्र व्यासयोस्तत्प्रमाणे विज्ञातव्ये वक्ष्यमाणप्रकारात् ॥

कल्प्यते व बिन्दोः वट रेखोपरि गंव लम्बः,

यस्य बृहल्लघुव्यासाभ्यां क्रमेण ग, गं बिन्दौ सम्पातः, तदा गवट त्रिभुजं जात्यं स्यात्,

अतो रेखागणितस्य षष्ठाध्यायेन,



चित्रम् १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: M

$$\text{गर} = \frac{\text{वर}^2}{\text{रट}}, \text{ परन्तु } \text{वर}^2 = \frac{\frac{1}{4}\text{लव्या}^2 \left(\frac{1}{4}\text{वृव्या}^2 - \text{केर}^2\right)}{\frac{1}{4}\text{वृव्या}^2},$$

$$\text{रट} = \frac{\frac{1}{4}\text{वृव्या}^2 - \text{केर}^2}{\text{केर}} \text{ अतः}$$

$$\text{गर} = \frac{\text{केर} \times \text{लव्या}^2}{\text{वृव्या}^2}, \text{ केर } (1 - \text{इ}^2) \text{ यतः } \frac{\text{लव्या}^2}{\text{वृव्या}^2} = 1 - \text{इ}^2$$

ततः $\text{केग} = \text{केर} - \text{गर} = \text{इ}^2\text{–केर}$

$$\text{एवं } \text{केगं} = \frac{\text{वर} \times \text{केग}}{\text{गर}} = \frac{\text{वर} \times \text{केर-इ}^2}{(1 - \text{इ}^2)\text{ केर}} = \frac{\text{वर} \times \text{इ}^2}{1 - \text{इ}^2}$$

अतः—

२९. **निष्पत्तिवर्गेण हता स्वदोर्मितिः कोटिश्च भक्ता क्रमशः पृथिव्या ।**
निष्पत्तिवर्गोनभुवेह लब्धी बृहल्लघुव्यासजयोगमाने ॥

(२८ सूत्रे, $\text{वग}^2 = \text{गर}^2 + \text{वर}^2$,

$$\text{परन्तु } \text{गर} = \text{केर } (1 - \text{इ}^2), \text{ वर}^2 = \frac{\text{लव्या}^2}{\text{वृव्या}^2}\left(\frac{1}{4}\text{वृव्या}^2 - \text{भु}^2\right)$$

$$= (1 - \text{इ}^2)\left(\frac{1}{4}\text{वृव्या}^2 - \text{केर}^2\right)$$

$$\therefore \text{वग}^2 = (1 - \text{इ}^2)\left(\frac{1}{4}\text{वृव्या}^2 - \text{केर} + \text{केर}^2 - \text{इ}^2.\text{केर}^2\right)$$

$$= (1 - \text{इ}^2)\left(\frac{1}{4}\text{वृव्या}^2 - \text{इ}^2.\text{केर}^2\right)$$

$$= (1 - \text{इ}^2)\left(\frac{1}{2}\text{वृव्या} + \text{इ}.\text{केर}\right)\left(\frac{1}{2}\text{वृव्या} - \text{इ}.\text{केर}\right)$$

अथ च, $\left(\frac{1}{2}\text{वृव्या} + \text{इ}.\text{केर}\right) = \text{नाव}$

$\left(\frac{1}{2}\text{वृव्या} - \text{इ}.\text{केर}\right) = \text{नांव}$

$\therefore \text{वग}^2 = (1 - \text{इ}^2)\text{ नाव-नांव}$

अनेन—

३०. **नाभिभ्यां ये रेखिके बिन्दुयाते तद्घातोऽल्पव्यासवर्गघ्न आप्तः ।**
कृत्याऽनल्पव्याससंज्ञस्य वर्गः स्यात् तद्बिन्दोर्योगबिन्द्वन्तरस्य ॥

अस्योपपत्तिर्भवति । एवमेव—

$$\frac{\text{केग}}{\text{गर}} = \frac{\text{गगं}}{\text{वग}} \therefore \frac{\text{केग} + \text{गर}}{\text{गर}} = \frac{\text{गगं} + \text{वग}}{\text{वग}} = \frac{\text{केर}}{\text{गर}} = \frac{\text{वगं}}{\text{वग}}$$

$$\therefore \text{वगं} = \frac{\text{केर}.\text{वग}}{\text{गर}} = \frac{\text{वग}}{1 - \text{इ}^2} \quad \therefore \text{वगं}^2 = \frac{\text{वग}^2}{(1 - \text{इ}^2)^2} = \frac{\text{नाव नांव}}{1 - \text{इ}^2}$$

अनेनेदं सिध्यति—

३१. **नाभिभ्यां बिन्दुगतयो रेखयोर्यो वधो भवेत् ।**
निष्पत्तिवर्गहीनेन्दुभक्तोऽभीष्टा कृतिर्भवेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



चित्रम् १८

कल्प्येते वव′ रेखाया व′ बिन्दोर्भुजकोटिमाने क्रमेण भु = केर, को = व′र, तथा व बिन्दोः भु′ = केर′, को′ = वर′

व′ल रेखा केट रेखायास्समानान्तरा कार्या, तदा ∠वव′ल = ∠वटर′ = अ,

∴ वल ज्याअ. ववं, ततः वरं = को × ज्याअ. ववं ।

एवं वंल = कोज्याअ·ववं, ततः केरं = भु − कोज्याअ. ववं अत्र त्रिज्या रूपमिता ग्राह्या),

